श्रीमते श्री लक्ष्मीनृसिंह परब्रह्मणे नमः

## श्री चोलसिंहपुर (श्रीघटिकाचल)

# ॥ श्री योगलक्ष्मनिरासिंह सुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल! कर्तव्यं दैवमाह्निकम् ॥
उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

मातः सुधाफललते! महनीयशीले!
वक्षोविहाररसिके! नृहरेरजस्रम् ।
क्षीराम्बुराशितनये! श्रितकल्पवल्लि!
श्रीमन्नृसिंहदयिते! तव सुप्रभातम् ॥ १ ॥

तव सुप्रभात-मनवद्य-वैभवे
घटिकेश-सद्गुण-निवास-भूतले ।
घटिताखिलार्थ-घटिकाद्रिशेखरे
घटिकाद्रिनाथ-दयिते! दयानिधे ॥ २ ॥

अद्यादिका मुनिगणा विरचय्य सन्ध्यां
दिव्यस्रवन्मधुझरीक-सरोरुहाणि ।
पादार्पणाय परिगृह्य पुरः प्रपन्नाः
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ३ ॥

सप्तर्षिसङ्घकृत-सस्तुति-सुप्रसन्न!
श्रीमन्नृसिंह गुणरूप रमामहीभ्याम् ।
साकं नृसिंहगिरि-सत्वकृताधिवास!
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ४ ॥

देवारिभञ्जन-मरुत्सुत-दत्तशङ्ख-
चक्रातपत्रित-फणीश्वर-पत्रिशेषिन् ।
देवेन्द्रमुख्य-सुरपूजित-पादपद्म
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ५ ॥

स्वामिन्! सुरेश! मधुरेश! समाहितार्थं
ध्यानप्रवीण! विनतावन-जागरूक ।
सर्वज्ञ! सन्तत-समीरित-सर्ववृत्त!
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ६ ॥

प्रह्लादरक्षण-निदान-कृतावतार!
मुग्धस्वकीयनखरैः स्फुटितारिवक्षः ।
सर्वाभिवन्द्य-निजवैभव-चन्द्रकान्त!
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ७ ॥

भक्तोचितादिसरसः सुगुणं प्रकृष्टं
तीर्थं सुवर्णघट-पूरित-मादरेण ।
धृत्वा श्रुतिप्रवचनैकपरा लसन्ति
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ८ ॥

संश्लाघनीय-परमोत्तर-रङ्गवासि-
सूरि-स्तुति-प्रथितविग्रह-कान्तिकान्त ।
सद्भिः समर्चित-पदाम्बुज! साधुरक्षिन्
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ९ ॥

तीर्थानि गोमुखगतान्यखिलानि धृत्वा
भव्यानि भव्यनिकराः परितो लसन्ति ।
गायन्ति गानचतुरास्तव दिव्यवृत्तं
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ १० ॥

वाराणसी-प्रथित-विष्णुपदी-प्रयाग-
विख्यात-विश्वनत-सद्घटिकाचलेन्द्र ।
सम्प्रार्थितार्थ-परिदान-कृतैकदीक्ष!
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ ११ ॥

पार्श्वद्वयस्थित-रमामहिशोभमान!
श्रीचोलसिंहपुर-भाग्यकृतावतार ।
स्वामिन् सुशील-सुलभाश्रितपारिजात !
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ १२ ॥

श्रीश्रीनिवास-घनदेशिकवर्य-भक्ति-
संवर्धित-प्रतिदिनोत्सव-शोभमान ।
कल्याणचेल-कनकोज्ज्वलभूषणाढ्य !
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ १३ ॥

श्रीब्रह्मतीर्थतटमागत-मज्जनार्थं
देवं प्रणम्य वरदं घटिकाद्रिमेत्य ।
वाधूल-मानिधि-महागुरुरेष आस्ते
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ १४ ॥

आचार्यपूरुषवरा ह्यभिरामवृद्धा
अर्हाभिपूज्यतर-मङ्गलवस्तुहस्ताः ।
त्वत्पादपङ्कज-सिषेविषया प्रपन्नाः
श्रीमन्नृसिंह! विजयीभव सुप्रभातम् ॥ १५ ॥

श्रीमन्नृसिंह-गिरि-शेखर-सुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेभ्यः प्रसन्नवदनः कमलासहायः
सर्वाणि वाञ्छितफलानि ददाति कामम् ॥ १६ ॥